# Atmavabodhanastotram

# આત્માવબોધનસ્તોત્રમ્

## Document Information

Text title : AtmAvabodhanastotram

File name : AtmAvabodhanastotram.itx

Category : misc, vedanta, upadesha, sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Location : doc_z_misc_general

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran

Latest update : November 9, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

December 22, 2023

*sanskritdocuments.org*

# આત્માવબોધનસ્તોત્રમ્

જાગ્રત્સ્વપ્નસુષુપ્તિષુ શૈશવકૌમારવાર્ધકેષ્વપિ ચ ।
અનુવર્તમાનમનિશં બ્રહ્માસ્મ્યામ્નાયમસ્તકાવેદ્યમ્ ॥ ૧॥

સદ્ગુરુસવનાનરતઃ સ્વાશ્રમવર્ણોચિતાનિ કર્માણિ ।
કુર્વદ્ભિર્વિવિદિષિતં બ્રહ્માસ્મ્યામ્નાયમસ્તકાવેદ્યમ્ ॥ ૨॥

ઉદ્દાલકઃ સ્વપુત્રં યત્તત્ત્વમસીતિ બોધયામાસ ।
સામ્નામન્તે તદહં બ્રહ્માસ્મ્યામ્નાયમસ્તકાવેદ્યમ્ ॥ ૩॥

સ્થૂલાત્સૂક્ષ્માદ્ધેતોર્દેહાદ્ભેદેન યોગનિષ્ણાતૈઃ ।
અનુચિન્ત્યમાનમસકૃદ્બ્રહ્માસ્મ્યામ્નાયમસ્તકાવેદ્યમ્ ॥ ૪॥

યદદેહમખિલદેહેષ્વનવસ્થેષુ વ્યવસ્થિતં વિભું ચ ।
મહદાત્મભૂતમભયં બ્રહ્માસ્મ્યામ્નાયમસ્તકાવેદ્યમ્ ॥ ૫॥

હૃદયસ્થિતાનશેષાંસ્ત્યક્ત્વા કામન્ સમશ્નુતેઽત્રૈવ ।
યત્પરહંસસ્તદહં બ્રહ્માસ્મ્યામ્નાયમસ્તકાવેદ્યમ્ ॥ ૬॥

યદબોધાજ્જગદખિલં વિભાતિ પુરુષસ્ય સત્યતયા ।
યદ્બોધાચ્ચ મૃષા તદ્બ્રહ્માસ્મ્યામ્નાયમસ્તકાવેદ્યમ્ ॥ ૭॥

પ્રવિલાપ્ય દૃશ્યજાલં મિથ્યેત્યાચાર્યવાક્યતઃ શાસ્ત્રાત્ ।
યત્પ્રાપ્નોતિ નરસ્તદ્બ્રહ્માસ્મ્યામ્નાયમસ્તકાવેદ્યમ્ ॥ ૮॥

યસ્યાજ્ઞાનાદખિલાનર્થાદિમકારણં શરીરાદૌ ।
આત્મત્વધીરભૂત્તદ્બ્રહ્માસ્મ્યામ્નાયમસ્તકાવેદ્યમ્ ॥ ૯॥

યત્સાક્ષાત્કૃતયે હિ શ્રવણં મનનં તથા ધ્યાનમ્ ।
પ્રાહુસ્ત્રય્યન્તાસ્તદ્બ્રહ્માસ્મ્યામ્નાયમસ્તકાવેદ્યમ્ ॥ ૧૦॥

નદ્યાસ્તીરે પુલિને ગિરિમૌલૌ કાનનસ્ય કોણે યત્ ।
ધ્યાયન્તિ યતિવરાસ્તદ્બ્રહ્માસ્મ્યામ્નાયમસ્તકાવેદ્યમ્ ॥ ૧૧॥

યત્ર સ્થિતો વિજાનાતીન્દ્રોપેન્દ્રાદિપદમપીષદિતિ ।
તત્સુખવિશ્રાન્તિપદં બ્રહ્માસ્મ્યામ્નાયમસ્તકાવેદ્યમ્ ॥ ૧૨॥

શ્રુત્યાચાર્યકૃપાતો યોગાભ્યાસેન ચેશ્વરકટાક્ષાત્ ।
પ્રભવતિ યદ્બોધસ્તદ્બ્રહ્માસ્મ્યામ્નાયમસ્તકાવેદ્યમ્ ॥ ૧૩॥

યસ્મિન્સ્થિતે ન દુઃખૈરપિ ગુરુભિશ્ચાલ્યતે જાતુ ।
પુરુષઃ સુખરૂપં તદ્બ્રહ્માસ્મ્યાન્નાયમસ્તકાવેદ્યમ્ ॥ ૧૪॥

યત્પૃથ્વ્યાદિષુ તિષ્ઠદ્યમયતિ યદ્વેદ નૈવ પૃથ્વ્યાદિઃ ।
અન્તર્યામ્યભિધં તબ્રહ્માસ્મ્યામ્નાયમસ્તકાવેદ્યમ્ ॥ ૧૫॥

વિષયાસક્તહૃદાં યદ્દૂરે તદસક્તચેતસાં નિકટે ।
ઉપરતવરલભ્યં તદ્બ્રહ્માસ્મ્યામ્નાયમસ્તકાવેદ્યમ્ ॥ ૧૬॥

વિનિયમ્ય ચક્ષુરાદીન્પ્રાણાપાનૌ ચ ચેતસા સહ યત્ ।
ધ્યાયન્તિ યોગિનસ્તદ્બ્રહ્માસ્મ્યામ્નાયમસ્તકાવેદ્યમ્ ॥ ૧૭॥

સનકાદિભ્યઃ પૂર્વં વટમૂલે શમ્ભુરાહ મૌનેન ।
ચિન્મુદ્રયા ચ યત્તદ્બ્રહ્માસ્મ્યામ્નાયમસ્તકાવેદ્યમ્ ॥ ૧૮॥

ઇતિ શ ૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતં આત્માવબોધનસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Atmavabodhanastotram*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*